॥ तलवकारोपनिषत्प्रारंभः ॥

श्रीमद्धनुमद्भीमसध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥ हरिः ॐ ॥ केनेषितंपततिप्रेषि

तंमनःकेनप्राणःप्रथमःप्रैतियुक्तः । केनेषितांवाचमिमांवदंतिचक्षुःश्रोत्रंकउदेवोयुनक्ति ॥१॥ श्रोत्रस्यश्रो
त्रंमनसोमनोयद्वाचोहवाचंसउप्राणस्यप्राणःचक्षुषश्चक्षुरतिमुच्यधीराःप्रेत्यास्माल्लोकादमृताभवंति ॥ २ ॥
नतत्रचक्षुर्गच्छतिनवाग्गच्छतिनोमनोनविद्मनविजानीमोयथैतदनुशिष्यात् ॥ ३ ॥ अन्यदेवतद्विदिताद
थोअविदितादधि । इतिशुश्रुमपूर्वेषांयेनस्तद्व्याचचक्षिरे ॥४॥ यद्वाचानभ्युदितंयेनवागभ्युद्यते । तदेवब्र
ह्मत्वंविद्धिनेदंयदिदमुपासते ॥५॥ यन्मनसानमनुतेयेनाहुर्मनोमतं । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते
॥६॥ यच्चक्षुषानपश्यतियेनचक्षूंषिपश्यति । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते ॥७॥ यच्छ्रोत्रेणनशृणो
तियेनश्रोत्रमिदंश्रुतं । तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते ॥८॥ यत्प्राणेननप्राणितियेनप्राणःप्रणीयते ।
तदेवब्रह्मत्वंविद्धिनेदंयदिदमुपासते ॥९॥ खं०॥१॥ यदिमन्यसेसुवेदेतिदहरमेवापिनूनंत्वंवेत्थब्रह्मणोरूपं ।
यदस्यत्वंयदस्यदेवेष्वथनूमीमांस्यमेवते ॥१॥ मन्येविदितंनाहंमन्येसुवेदेति । नोनवेदेतिवेदच । योनस्त
द्वेदतद्वेदनोनवेदेतिवेदच । यस्यामतंतस्यमतंमतंयस्यनवेदसः ॥२॥ अविज्ञातंविजानतांविज्ञातमविजा

नतां । प्रतिबोधविदितंमतममृतत्वंहिविंदते । आत्मनाविंदतेवीर्यंविद्ययाविंदतेमृतं ॥३॥ इहचेदवेदीद
थसत्यमस्ति । नचेदिहावेदीन्महतीविनष्टिः । भूतेषुभूतेषुविचित्यधीराः । प्रेत्यास्माल्लोकादमृताभवंति
॥ ४ ॥ खं० ॥ २ ॥ ब्रह्महदेवेभ्योविजिग्ये । अथतस्यहब्रह्मणोविजयेदेवाअमहीयंत तऐक्षंतास्माकमेवायं
विजयोस्माकमेवायंमहिमेति । तद्धैषांविजज्ञौ ॥१॥ तेभ्योहप्रादुर्बभूव । तन्नव्यजानत । किमिदंयक्षमि
ति । तेग्निमब्रुवन् । जातवेदएतद्विजानीहिकिमेतद्यक्षमिति । तथेतितदभ्यद्रवत् । तमभ्यवदत्कोसीति ।
अग्निर्वाअहमस्मीत्यब्रवीज्जातवेदावाअहमस्मीति । तस्मिंस्त्वयिकिंवीर्यमिति । अपीदंसर्वंदहेयंयदिदंपृथि
व्यामिति तस्मैतृणंनिदधावेतद्दहेति । तदुपप्रेयायसर्वजवेन । तन्नशशाकदग्धुं । सततएवनिववृते । नैत
दशकंविज्ञातुंयदेतद्यक्षमिति ॥२॥ अथवायुमब्रुवन् । वायवेतद्विजानीहिकिमेतद्यक्षमिति । तथेतितदभ्य
द्रवत् । तमभ्यवदत्कोसीति । वायुर्वाअहमस्मीत्यब्रवीन्मातरिश्वावाअहमस्मीति । तस्मिंस्त्वयिकिंवीर्य
मिति । अपीदंसर्वमाददीयंयदिदंपृथिव्यामिति । तस्मैतृणंनिदधावेतदादत्स्वेति तदुपप्रेयायसर्वजवेनत
न्नशशाकादातुं । सततएवनिववृते । नैतदशकंविज्ञातुं यदेतद्यक्षमिति । अथेंद्रमब्रुवन् । मघवन्नेतद्विजा

नीहिकिमेतद्यक्षमिति तथेतितदभ्यद्रवत् । तस्मात्तिरोदधे । सतस्मिन्नेवाकाशेस्त्रियमाजगामबहुशोभमा
नामुमांहैमवतीं । तांहोवाचकिमेतद्यक्षमिति ॥३॥ खं०॥३॥ ब्रह्मेतिहोवाच । ब्रह्मणोवाएतद्विजयेदेवाअ
महीयध्वमिति । ततोहैवविदांचकारब्रह्मेति । तस्माद्वाएतेदेवाअतितरामिवान्यान्देवान्यदग्निर्वायुरिंद्रस्तेह्ये
नन्नेदिष्ठंपस्पृशुः॥१॥ तेह्येनत्प्रथमोविदांचकारब्रह्मेति । तस्माद्वाइंद्रोतितरामिवान्यान्देवान् सह्येनन्नेदिष्ठंप
स्पर्श सह्येनत्प्रथमोविदांचकारब्रह्मेति॥२॥ तस्यैषआदेशोयदेतद्विद्युतोभिव्यद्युतदा ३ इति न्यमीमिषदा ३
इत्यधिदैवतं ॥ अथाध्यात्मं । यदेतद्गच्छतीवचमनोनेनैवतदुपस्मरति । अभीक्ष्णंसंकल्पः । तद्धतद्वनंनाम
तद्वनमित्युपासितव्यं॥३॥सयएतदेवंवेदाभिहैनंसर्वाणिभूतानिसंवांछंति।उपनिषदंभोब्रूहीति। उक्तातउपनि
षत्।ब्राह्मींवावतउपनिषदमब्रूमेति।तस्यैतपोदमःकर्मेतिप्रतिष्ठा। वेदाःसर्वांगानिसत्यमायतनं।योहवाएतामु
पनिषदंवेदापहत्यपाप्मानमनंतेस्वर्गेलोकेज्येयेप्रतितिष्ठतिप्रतितिष्ठति ॥४॥खं०॥४॥ इतितलवकारोपनिषत्
श्रीमद्धनुमद्भीममध्वांतर्गतरामकृष्णवेदव्यासात्मकलक्ष्मीहयग्रीवायनमः ॥हरिःॐ॥ अनंतगुणपूर्णत्वादग
म्यायसुरैरपि । सर्वेष्टदात्रेदेवानांनमोनारायणायते । वैजयंतेसमासीनमेकांतेचतुराननं । विष्णोर्विविदिषु

स्तत्त्वंपर्यपृच्छत्सदाशिवः । यदिदंपुरुषावश्यंतत्रतत्रपतेन्मनः । केनतत्प्रेरितंयातिप्राणःसर्वोत्तमस्तथा ।
चक्षुःश्रोत्रंतथावाचंकोदेवोविनियोजयेत् । इतिपृष्टस्तदाब्रह्माप्राहदेवमुमापतिं । ध्यात्वानारायणंदेवंसर्वा
धारमनूपमं । सर्वज्ञंसर्वशक्तिंचसर्वदोषविवर्जितं । यःप्राणस्यप्रणेताचचक्षुरादेश्चसर्वशः । अगम्यःसर्वदेवै
श्चपरिपूर्णत्वहेतुतः । प्राणादीनांप्रणेताचसर्ववेत्ताचसर्वशः । सर्वोत्तमश्चसर्वत्रसविष्णुरितिधार्यतां ॥ खं०
॥१॥ यंसम्यङ्नैवजानातिकश्चिन्निरवशेषतः । सर्वात्मनाविजानामीतितुयस्यमतंभवेत् । तस्याज्ञातःसभ
गवान्योनैवंमन्यतेसदा । ज्ञातस्तस्यतथास्यैवनिःशेषंमननंकृतं । इतियोमन्यतेनास्यमतःसपुरुषोत्तमः ।
नातिवेद्योनचावेद्यस्तस्मात्सपरमेश्वरः । नेदंजीवस्वरूपंतद्ब्रह्मविष्ण्वाख्यमव्ययं । किंतुयत्तेसमीपस्थमासते
विनियामकं । तदेवब्रह्मविद्धित्वंविष्ण्वाख्यंपरमव्ययं । नियामकंतद्देवानांमर्त्यानांकिमुतोत्तमं । तत्प्रसा
दंविनाजीवेमंतव्यानप्रवृत्तयः । किमुजीवस्यतद्भावोनमंतव्यइतीर्यते ॥खं० ॥२॥ इत्यत्राख्यायिकांवच्मि
शृणुतांत्वंमहेश्वर । स्थित्वादेवेषुतद्ब्रह्मव्यजयद्दैत्यदानवान् । देवेभ्योर्थायविजयंतेदेवामेनिरेस्वकं ।आवि
ष्टाअसुरैस्तेषांप्रबोधायजनार्दनः । यक्षरूपःप्रादुरभूदुमाशिवसमन्वितः । ब्रह्मणाचापिसहितएतेभ्योपिप

॥ ३ ॥

रोह्यहं । एतेपिमेभृत्यभूताःपरिवार्यव्यवस्थिताः । इतिज्ञापयितुंविष्णुःसहतैरप्युपागतः । यूयमेतानपिज्ञा
तुमशक्ताःकिमुमामिति । तज्ज्ञानार्थंहुताशश्चनासिक्योवायुरेवच । इंद्रश्चक्रमशोजग्मुस्तंज्ञातुंनैवचाश
कन् । तत्रेंद्रोधिकबुद्धित्वात्पृच्छतीतिजनार्दनः । मत्तःशिवाद्ब्रह्मणश्चश्रोतुंनैवापिशक्तिमान् । इतिज्ञाप
यितुंतत्रनादृश्यतसकेशवः । एषैवज्ञानदानेतेयोग्योमेतिव्यदर्शयत् ॥खं०॥३॥ उमासासम्यगाचष्टतस्मैवि
ष्णुंपरंपदं । यस्माद्ब्रह्माचवायुश्चशेषवींद्रौशिवस्तथा । सभार्यागर्विणोनासन्सुरेभ्यस्तेधिकास्ततः । इंद्रस्तु
प्रथमंब्रह्मव्यजानात्तेनतूत्तमः । दक्षादिभ्यस्तथाकामस्तज्ज्ञातुंपूर्वमुक्तवान् । दक्षोबृहस्पतिश्चैवमनुःकामा
त्मजस्तथा । सूर्याचंद्रमसौधर्मोवरुणश्चोचुरोमिति । नासिक्यवायुरग्निश्चप्रथमंतदपश्यतां । सर्वदेवाधिका
स्तस्मादेतेदेवाःप्रकीर्तिताः । एतेभ्यश्चेंद्रकामौतुताभ्यांब्रह्मादयोधिकाः । एतेषामवमोवह्निःपरमोविष्णुरु
च्यते । अंतरालेस्थितास्त्वन्येब्रह्माद्याःपूर्वमीरिताः । अग्निःपश्चाद्व्यजानात्तदिंद्रवाक्यात्ततोवमः । तस्माद्वि
ष्णवभिसंबंधात्पारावर्यंसुरेष्विदं । व्यद्योतयद्विद्युदादीन्कपिलाख्यस्तुयोहरिः । अक्ष्णोर्निमेषणंकृत्वायःशे ॥६७९॥
तेक्षीररसागरे । सएवैकःपरंब्रह्मेत्येवंतस्योपदेशनं । अधिदैवतथाध्यात्मेयंमनोगच्छतीवच। सम्यङ्गगच्छति

कापिमनोयेनस्मरत्यपि । सोनिरुद्धाख्यईशेशःपरंब्रह्मेतिकीर्त्यते । सविष्णुस्तद्वनंनामतत्त्वाद्वननीयतः।
एवमेनंतुयोवेदभवेत्सर्वैरपेक्षितः । एतच्छ्रुत्वाहरोपृच्छद्ब्रह्माणंपुनरेवतु । विद्याकारंममब्रूहीत्युक्तोब्रह्माहतं
पुनः । विद्यावेद्यंतवप्रोक्तमास्थानंतेवदाम्यहं । तपोदमस्वधर्मेषुयेस्थितास्तेषुतिष्ठति।विद्यास्थानानितस्या
स्तुवेदाअंगानिनिर्णयः । वेदैतामेवमखिलंयोविष्णौप्रतितिष्ठतीत्यादिब्रह्मसारे । विद्युतःसूर्यादिप्रकाशान्
आसमंताद्यद्युतत्प्राकाशयत् । यदादित्यगतंतेजोजगद्भासयतेखिलं । यच्चंद्रमसियच्चाग्नौतत्तेजोविद्धिमा
मकमितिवचनात् । तमेवभांतमनुभातिसर्वंतस्यभासासर्वमिदंविभातीतिच । न्यमीमिषदासमंतान्निमीलि
ताक्षमभवत् । सवैकिलायंपुरुषःपुरातनोयएकआसीदविशेषआत्मनि । अग्रेगुणेभ्योजगदात्मनीश्वरेनि
मीलितात्मानिशिसुप्तशक्तिष्वितिवचनात् । पूर्णत्वाच्चआः । अभीक्ष्णंसंकल्पइतिमनसोविशेषणं।संकल्पक
मित्यर्थः । सप्रतिष्ठांसायतनामुपनिषदंब्रूहीत्युक्तेसम्यगेवमयोपनिषत्स्वरूपमुक्तं । तत्रवक्तव्यंनास्ति । तपो
दमःकर्मचविद्यायाःप्रतिष्ठा । तद्वत्सुविद्याप्रतितिष्ठतीत्यर्थः । सत्यमितिमीमांसा । निर्णीयतेयतःसम्यगि
दंसत्यमितिस्फुटं । श्रुतिस्मृत्युदितंसर्वंव्यक्तंमीमांसयैतया । सत्यमित्युच्यतेतस्मान्मीमांसाब्रह्मनिश्चयइ

तिशब्दनिर्णये । ऋग्यजुःसामाथर्वाख्याःपंचरात्रंचभारतं । मूलरामायणंचैवपुराणंभगवत्परं । वेदाइत्यु
च्यतेसद्भिःशिक्षाद्यंस्मृतयस्तथा । अंगानिसत्यंमीमांसातद्विद्यायतनंत्रयमितिविद्यानिर्णये ॥ खं० ॥४॥
यश्चिदानंदसच्छक्तिसंपूर्णोभगवान्परः । नमोस्तुविष्णवेतस्मैप्रेष्ठायप्रेयसांचमे ॥ इतिश्रीमदानंदतीर्थभगव
त्पादाचार्यविरचितंतलवकारोपनिषद्भाष्यंसंपूर्णम् ॥ ॥ ॥ ॥

॥ तलवकारभाष्यंसंपूर्णं ॥

The Credit of getting the Sarvamoola Books Scanned goes to Panditavareenya ityaadi birudankita Shreemajjaalihaala Shreenivaasaachaaryasya Vidyaa Suta, "Gomanjari" Udgrantha kartru, (Raghunatha suri virachita Manikya manjari granthasya Khandana Grantha) Veda Shaastra Puraanaartha Vishaarada, Panditavareenya Shree Dwarakaanaathaachaaryaru. My heartful salute for him to provide me such a wonderful opportunity to work on this project.

Project Started on : 21 December 2009
Project Completed on : 20 March 2011

Scanned By : Aravindacharya Haranahalli, aravindbharadwajhs@gmail.com